শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৯৭

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৯৭

*উত্তমভক্তিপ্রার্থনা মার্কণ্ডেযোপাখ্যানম্ চ*

ত্রৈগুণ্যাদ্ভিন্নরূপং ভৱতি হি ভুৱনে হীনমধ্যোত্তমং যত
জ্ঞানং শ্রদ্ধা চ কর্তা ৱসতিরপি সুখং কর্ম চাহারভেদাঃ।
ত্বতক্ষেত্রত্বন্নিষেৱাদি তু যদিহ পুনস্ত্বৎপরং তত্তু সর্ৱং
প্রাহুর্নৈর্গুণ্যনিষ্ঠং তদনুভজনতো মঙক্ষু সিদ্ধো ভৱেযম্॥ ১॥

ত্বয্যেৱ ন্যস্তচিত্তঃ সুখমযি ৱিচরন্ সর্ৱচেষ্টাস্ত্বদর্থং
ত্বদ্ভক্তৈঃ সেৱ্যমানানপি চরিতচরানাশ্রযন্ পুণ্যদেশান্।
দস্যৌ ৱিপ্রে মৃগাদিষ্বপি চ সমমতির্মুচ্যমানাৱমান-
স্পর্ধাসূযাদিদোষঃ সততমখিলভূতেষু সম্পূজযে ত্বাম্॥ ২॥

ত্বদ্ভাৱো যাৱদেষু স্ফুরতি ন ৱিশদং তাৱদেৱং হ্যুপাস্তিং
কুর্ৱন্নৈকাত্ম্যবোধে ঝটিতি ৱিকসতি ত্বন্ময়োহং চরেযম্।
ত্বদ্ধর্মস্যাস্য তাৱত্ কিমপি ন ভগৱন্ প্রস্তুতস্য প্রণাশ-
স্তস্মাতসর্ৱাত্মনৈৱ প্রদিশ মম ৱিভো ভক্তিমার্গং মনোজ্ঞম্॥ ৩॥

তং চৈনং ভক্তিযোগং দ্রঢযিতুমযি মে সাধ্যমারোগ্যমাযু-
র্দিষ্ট্যা তত্রাপি সেৱ্যং তৱ চরণমহো ভেষজাযেৱ দুগ্ধম্।
মার্কণ্ডেযো হি পূর্ৱং গণকনিগদিতদ্বাদশাব্দাযুরুচ্চৈঃ
সেৱিত্বা ৱতসরং ত্বাং তৱ ভটনিৱহৈর্দ্রাৱযামাস মৃত্যুম্॥ ৪॥

মার্কণ্ডেযশ্চিরাযুঃ স খলু পুনরপি ত্বৎপরঃ পুষ্পভদ্রা-
তীরে নিন্যে তপস্যন্নতুলসুখরতিঃ ষট্ তু মন্বন্তরাণি।
দেৱেন্দ্রঃ সপ্তমস্তং সুরযুৱতিমরুন্মন্মথৈর্মোহযিষ্যন
যোগোষ্মপ্লুষ্যমাণৈর্ন তু পুনরশকত্ত্বজ্জনং নির্জযেত্ কঃ॥ ৫॥

প্রীত্যা নারাযণাখ্যস্তৱমথ নরসখঃ প্রাপ্তৱানস্য পার্শ্বং
তুষ্ট্যা তোষ্টূযমানঃ স তু ৱিৱিধৱরৈর্লোভিতো নানুমেনে।
দ্রষ্টুং মাযাং ত্বদীযাং কিল পুনরৱৃণোদ্ভক্তিতৃপ্তান্তরাত্মা
মাযাদুঃখানভিজ্ঞস্তদপি মৃগযতে নূনমাশ্চর্যহেতোঃ॥ ৬ ॥

যাতে ত্বয্যাশু ৱাতাকুলজলদগলত্তোযপূর্ণাতিঘূর্ণ-
তসপ্তার্ণোরাশিমগ্নে জগতি স তু জলে সম্ভ্রমন্ ৱর্ষকোটীঃ।
দীনঃ প্রৈক্ষিষ্ট দূরে ৱটদলশযনং কঞ্চিদাশ্চর্যবালং
ত্বামেৱ শ্যামলাঙ্গং ৱদনসরসিজন্যস্তপাদাঙ্গুলীকম্॥ ৭ ॥

দৃষ্টৱা ত্বাং হৃষ্টরোমা ত্বরিতমুপগতঃ স্প্রষ্টুকামো মুনীন্দ্রঃ
শ্বাসেনান্তর্নিৱিষ্টঃ পুনরিহ সকলং দৃষ্টৱান্ ৱিষ্টপৌঘম্।
ভূযোপি শ্বাসৱাতৈর্বহিরনুপতিতো ৱীক্ষিতস্ত্বৎকটাক্ষৈ-
র্মোদাদাশ্লেষ্টুকামস্ত্বযি পিহিততনৌ স্বাশ্রমে প্রাগ্বদাসীত্॥ ৮ ॥

গৌর্যা সার্ধং তদগ্রে পুরভিদথ গতস্ত্বৎপ্রিযপ্রেক্ষণার্থী
সিদ্ধানেৱাস্য দত্বা স্বযমযমজরামৃত্যুতাদীন্ গতোভূত্।
এৱং ত্বৎসেৱযৈৱ স্মররিপুরপি স প্রীযতে যেন তস্মা-
ন্মূর্তিত্রয্যাত্মকস্ত্বং ননু সকলনিযন্তেতি সুৱ্যক্তমাসীত্॥ ৯ ॥

ত্র্যংশেস্মিন্ সত্যলোকে ৱিধিহরিপুরভিন্মন্দিরাণ্যূর্ধ্বমূর্ধ্বং
তেভ্যোপ্যূর্ধ্বং তু মাযাৱিকৃতিৱিরহিতো ভাতি ৱৈকুণ্ঠলোকঃ।
তত্র ত্বং কারণাম্ভস্যপি পশুপকুলে শুদ্ধসত্ত্বৈকরূপী
সচ্চিদ্ব্রহ্মাদ্ৱযাত্মা পৱনপুরপতে পাহি মাম্ সর্ৱরোগাত্॥ ১০ ॥

**********